संस्कृत प्रयोग

(2) क्र. नं. ११० पुत्र प्राप्तिग्रह प्रयोग

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

✓ ३७८३.

(1)

अथदत्तपुत्रविधानप्रयोगः

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

पु० म० श्रीगणेशायनमः हरिःॐ ... अतःकृतसंस्कारोपिपंचवर्षा
१ धिकबालोपिदत्तकोभवतीतिसिद्धं॥ इतिग्राह्याग्राह्यविवेकः॥ कथं
ग्राह्यइत्यपेक्षायामाह॥ शौनकः॥ शौनकोहंप्रवक्ष्यामिपुत्रसंग्र
हमुत्तमं॥ वंध्योवामृतपुत्रोवापुत्रार्थेसमुपोष्यच॥ वाससीकुंडले
मु ५ छत्रंउष्णीषंचांगुलीयकं॥ आचार्यंधर्मसंयुक्तंवैष्णवंवेदपारगं॥
बर्हिःकुशमयंचैवपालाशंचेध्ममेवच॥ एतान्याहृत्यबंधूंश्चज्ञा
तीनाहूययत्नतः॥ बंधूंश्चान्नेनसंभोज्यब्राह्मणांश्चविशेषतः॥
अन्वाधानादियत्तंत्रंकृत्वाज्योसवनांतकं॥ दातुःसमक्षंगत्वातुपुत्रं
देहीतियाचयेत्॥ दानेसमर्थोदातास्मैयेयज्ञेनेतिपंचभिः॥ देवस्य
त्वेतिमंत्रेणहस्ताभ्यांप्रतिगृह्यच॥ अंगादंगेत्यृचंजप्त्वाचाघ्रायशि
शुंमूर्धनिवस्त्रादिभिरलंकृत्यछत्रछायागतंकृतं॥ नृत्यगीतैश्चवा राम १

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

घैश्च स्वस्तिशब्दैश्च संयुतः॥ गृहमेध्य[illegible]माधाय चरुं कृत्वा विधानतः॥
यस्त्वा हृदेति द्वाभ्यां च तुभ्यमग्रे ऋचैकया॥ सोमो ददद् इत्येताभिः प्रत्यृचं
पंचभिस्तथा॥ स्विष्टकृदादिशेषं च कृत्वा होमं समापयेत्॥ ब्राह्मणानां
सपिंडेषु कर्तव्यः पुत्रसंग्रहः॥ तदलाभे सपिंडेषु अन्यत्र तु न कारयेत्॥
क्षत्रियाणां स्वजातौ वै गुरुगोत्रसमोपि वा॥ वैश्यानां वैश्यजातेषु शूद्रा
णां शूद्रजातिषु॥ सर्वेषां चैव वर्णानां ज्ञातिष्वेव न चान्यतः॥ दौहित्रं भागि
नेयं वा शूद्राणां चापि दीयते॥ नैकपुत्रेण कर्तव्यं पुत्रदानं कदाचन॥ ब
हुपुत्रेण कर्तव्यं पुत्रदानं प्रयत्नतः॥ दक्षिणां गुरवे दद्याद्यथाशक्ति
द्विजोत्तमः॥ नृपो राष्ट्रार्धमेवापि वैश्यो रत्नशतत्रयं॥ शूद्रः सर्वस्वमे
वापि अशक्तश्चेद्यथाबलमिति॥ पंचभिरित्यनंतरं दद्यादिति शेषः॥
द्वाभ्यामिति द्वाभ्यामृग्भ्यां द्वे आकूती इति केचित्॥ तन्न वक्ष्यमाणबौ
धायनसूत्रे कमूलत्वप्रयुक्तलाघवलिप्सया एकस्या एव आकूतेः स्वी

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

कर्तुमुचितत्वात्॥ अयंच पुत्रप्रतिग्रहविधिर्बह्वृचविषयो बह्वृचगृह्यप्रति
पादकत्वाच्छौनकस्य॥ यजुर्वेदिनां तु पुत्रप्रतिग्रहविधिमाह बौधायनः॥ पु
त्रप्रतिग्रहविधिं व्याख्यास्यामः॥ शोणितशुक्रसंभवो मातृपितृनिमित्तक
स्तस्य प्रदानपरित्यागविक्रयेषु मातापितरौ प्रभवतो न त्वेकं पुत्रं दद्यात्॥
प्रतिगृह्णीयाद्वा स हि संतानाय पूर्वेषां न स्त्री पुत्रं दद्यात्॥ प्रतिगृह्णीया
द्वान्यत्रानुज्ञानाद्भर्तुः प्रतिग्रहीष्यन्नुपकल्पयते द्वे वाससी द्वे कुंडले अंगु
लीयकं चाचार्यं च वेदपारगं कुशमयं बर्हिः पर्णमयमिध्ममित्यथ बंधूना
हूय मध्ये राजनि चावेद्य परिषदि चागारमध्ये ब्राह्मणानन्नेन परिविष्य पु
ण्याहं स्वस्त्यृद्धिमिति वाचयित्वा देवयजनोल्लेखनप्रभृत्या प्रणीताभ्यः
कृत्वा दातुः समक्षं गत्वा पुत्रं मे देहीति भिक्षेत ददामीतीतर आह तं परि
गृह्णाति धर्माय त्वा परिगृह्णामि संतत्यै त्वा गृह्णामीत्यथैनं वस्त्रकुंड
लाभ्यां अंगुलीयकेन चालंकृत्य परिधानप्रभृत्याग्निमुखात्कृत्वा प



Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

काज्जुहोतियस्त्वाहृदाकीरिणामन्यमानइतिपुरोनवाक्यामनूच्यायस्मै
त्वंसुकृतेजातवेदइतियाज्ययाजुहोतिअथव्याहृतीर्हुत्वास्विष्टकृत्प्रभृ
तिसिद्धमाधेनुवरप्रदानाद्दक्षिणांददात्येतेचवाससीपरिधायएतेकुंड
लेएतच्चांगुलीयकंयद्येवंकृत्वौरसःपुत्रउत्पद्यतेतुरीयभागेप्रभवतीति
हस्माहबौधायनइति अंगुलीयकमित्यनंतरंअनुषक्तेनददातीत्यनेन मि५
कुंडलांगुलीयदानंप्रतिगृहीतंप्रतिविधीयते॥प्रभवतइतिमातापित्रो
रेवदानाधिकारइत्याशयः॥मध्यमइति॥बंधुसमक्षंराजन्यावैनंका २६
र्यमित्याशयः॥प्रभवतीतितुरीयभागमेवलब्धुंप्रभवतेत्याशयः॥अथबहु
चाधिकारिकाशौनकोक्तरीत्यापुत्रप्रतिग्रहप्रयोगः॥पूर्वेद्युःकृतोपवा
सःवाससीकुंडलेछत्रंउष्णीषंचांगुलीयकं॥आचार्यंधर्मसंयुक्तंवैष्णवं
वेदपारगं॥बर्हिःकुशमयंचैवइध्मंपालाशमेवच॥एतान्याहृत्यबंधूं
श्चज्ञातीनाहूययत्नतः॥पवित्रपाणिःप्राणानायम्यदेशकालौसंकी
र्त्यममअप्रजत्वप्रयुक्तपैतृक[illegible]णापाकरणपुंनामनरकत्राणद्वारा

"Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

पु० प्र ३

श्रीपरमेश्वरप्रीत्यर्थं शौनकोक्तविधिना पुत्रप्रतिग्रहं करिष्ये॥ तदंगत्वे
न स्वस्तिपुण्याहवाचनं आचार्यवरणं आचार्यस्य मधुपर्केणार्हणं विष्णुपू
जनं बंधुवर्ग ब्राह्मणेभ्योन्नदानं च करिष्ये॥ तत्रादौ निर्विघ्नतासिध्यर्थं
(१) गणपतिपूजनं करिष्य इति संकल्प्य वरणांतं कृत्वा मधुपर्कांते पितृणां कु
लदेवतानां गुरूणां प्रीत्यर्थं ब्राह्मणान्बंधूंश्च भोजयेत्॥ तत आचार्यो देश
कालौ संकीर्त्य यजमानानुज्ञया पुत्रप्रतिग्रहांगत्वेन विहित होमं करिष्ये॥
अग्निप्रतिष्ठापनांतं कृत्वान्वाधानं कुर्यात्॥ चक्षुषी आज्येनेत्यंतेत्र प्रधानं
सकृदग्निं षड्वारं सूर्यां सावित्रीं चरुणा अग्निं वायुं सूर्यं प्रजापतिं चाज्येन शे
षेण स्विष्टकृतमित्यादि अष्टाविंशतिमुष्टीन् तूष्णीं निरूप्य तावत्कृत्वः प्रोक्ष्य
आज्योत्पवनांतं कृत्वा ब्राह्मणैः सह दातुः समक्षं गच्छेत्॥ दातारं प्रत्यस्मै पु
त्रं देहीति ब्राह्मणद्वारा याञ्चां कारयेत्॥ ततो दाता आचम्य प्राणानाय
म्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पुत्रदानं करिष्ये॥ गणपति
पूजनं यथाशक्ति चंदनादिना प्रतिग्रहीतारं संपूज्य येयज्ञेनेति पंचानां राम ३
नाभानेदिष्ठो मानवऋषिः॥ विश्वेदेवा देवता॥ ओं आद्यास्त्वतस्त्रास्त्रिष्टुभः॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, "Vegumay"

(५ A)

पंचम्यनुष्टुप्॥ पुत्रदाने विनियोगः॥ येयज्ञेन दक्षिणया समक्ता० परिज
ह्निरे इत्यं ते इमं पुत्रं तवं पैतृक ऋणापाकरण पुंनाम नरकत्राण सिध्यर्थं
आत्मनश्च श्रीपरमेश्वरप्रीत्यर्थं तुभ्यमहं संप्रददे न मम प्रतिगृह्णातु पुत्रं
भवानित्यं ते प्रतिगृह्णात्व हस्ते साक्षतं जलं क्षिपेत्॥ ततः प्रतिगृहीतारेव
स्य त्वेति मंत्रेण हस्तद्वयेन प्रतिगृह्य स्वांके उपवेश्य अंगादंगादिति शिशु
मूर्धनि आजिघ्रेत्॥ ततो युवं वस्त्राणीति वस्त्रं परिधाप्य तूष्णीमुष्णीषं ब
ध्वा कुंकुमादिना तिलकं कृत्वा हिरण्यरूप इत्यादिना कुंडलादिभिरलंकृ
त्य छत्रेणाछादितं बालं नृत्यगीतवाद्यैः स्वस्ति नो मिमीतामित्यादि मंत्रै
श्च गृहमानीय हस्तौ पादौ प्रक्षाल्याचम्य अग्नेः पश्चिमतो मातुरुत्संगे
स्वदक्षिणतो बालमुपवेश्य॥ आचार्य दक्षिणतः स्वयमुपविशेत्॥ ततः
आचार्यो बर्हिरास्तरणादि आज्यभागांतं कुर्यात्॥ ततश्चरुमवदानवि
धिनावदाय यस्त्वा हृदा कीरिणेति द्वयो रात्रेयो वसुश्रुत ऋषिः॥ अग्नि
र्देवता त्रिष्टुप् छंदः॥ पुत्र प्रतिग्रहांग होमे वि० यस्त्वा हृदा की० स्वस्ति

ऋग्द्वयंक्रमेणपठित्वास्वाहेतिजुहुयात्॥यजमानःअग्नयइदं०पुनर
वदायतुभ्यमग्रइतिमंत्रस्यसूर्यासावित्रीसूर्यासावित्र्यनुष्टुप्॥पुत्रप्र०
तुभ्यमग्रेपर्यवहन्०सहस्वाहा॥सूर्यासावित्र्याइदं०पुनरवदायसोमो
ददिदितिपंचानांसूर्यासावित्रीऋषिः॥सूर्यासावित्रीदेवता॥आद्येद्वे
अनुष्टुभौ॥तृतीयाजगती॥चतुर्थीत्रिष्टुप्॥पंचम्यनुष्टुप्॥पुत्रप्र०पुन
रवदायपंचभिर्जुहुयात्॥सूर्यासावित्र्याइदमित्यागः॥ततोव्यस्तसमस्त ति५
व्याहृतिभिराज्यंहुत्वास्विष्टकृदादिहोमशेषंसमाप्यआचार्यायधेनुं
दद्यात्॥दशात्रीन्ब्राह्मणान्भोजयेत्॥कर्मणःसंपूर्णतांवाचयित्वाईश्व
रार्पणंकुर्वीतेतिशौनकोक्तपुत्रप्रतिग्रहप्रयोगः॥ छ दत्तविधा
नःसमाप्तः छ छ शके१७२२रौद्रनामसंवत्सरेइदंपुस्तकं॥
नित्सरोपनामकअनंतभटस्य॥ शुभमस्तु॥ ॥ ॥



Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "Joint project"

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com